अपि च ।

पितामह उवाच ।

“माघमासि शुक्लपक्षे ऋक्षे पुष्येण युता पुरा ।
एकादशी तथा चैषा भीमेन समुपोषिता ॥
आश्चर्य्यन्तु व्रतं कृत्वा पितृणामनृणो भवेत् ।
भीमद्वादशीति विख्याता प्राणिनां पुण्यवर्द्धिनी ॥
नक्षत्रेण विनाप्येषा ब्रह्महत्यादि नाशयेत् ।
विनिहन्ति महापापं कुनृपो विषयं यथा ।
कुपुत्त्रस्तु कुलं यद्वत् कुभार्य्या च पतिं यथा ।
अधर्म्मश्च यथा धर्म्मः कुमन्त्री च यथा नृपम् ॥
अज्ञानेन यथा ज्ञानं शौचश्चाशौचता यथा ।
अश्रद्धया यथा श्राद्धं सत्यञ्चैवानृतैर्यथा ॥
हिमं यथोष्णमादद्यादनर्थश्चार्थसञ्चयः ।
यथा प्रकीर्त्तनाद्दानं तपो वै विस्मयाद्यथा ॥
अशिक्षया यथा पुत्त्रो गावो दूरगतैर्यथा ।
क्रोधेन च यथा शान्तं यथा वित्तमवर्द्धनात् ॥
यथा समीहनाज्ज्ञानं फलानाञ्च यतव्रताः ।
तथैव पापनाशाय प्रोक्तेयं द्वादशी शुभा ॥
ब्रह्महत्या सुरापानं स्तेयं गुर्व्वङ्गनागमः ।
युगपदुपजातानि नहि हन्ति त्रिपुष्करम् ॥
न चापि नैमिषं क्षेत्रं कुरुक्षेत्रं प्रभासकम् ।
कालिन्दी यमुना गङ्गा न रेवा न सरस्वती ॥
न चैव सर्व्वतीर्थानि एकादश्याः समानि च ।
न दानं न जपो होमो न चान्यसुकृतं क्वचित् ॥
एकतः पृथिवीदानमेकतो हरिवासरः ।
ततोऽप्यधिका महापुण्या इयमेकादशी परा ॥
अस्मिन् वराहवपुषः कृत्वा देहन्तु हाटकम् ।
घटोपरि नवे पात्रे कृत्वा वै ताम्रभाजने ॥
सर्व्वबीजन्तु ते विप्राः सितवस्त्रावगुण्ठिते ।
सहिरण्यप्रदीपाद्यैः कृत्वा पूजां प्रयत्नतः ॥
वराहाय नमः पादौ क्रोड़ाकृति नमः कटिम् ।
नाभिं गम्भीरघोराय उरःश्रीवत्सधारिणे ॥
बाहू सहस्रशिरसे ग्रीवां सर्व्वेश्वराय च ।
मुखं सर्व्वात्मने पूज्य ललाटं प्रभवाय च ।
केशाः शतमयूखाय पूज्या देवस्य चक्रिणः ॥
विधिना पूजयित्वा तु कृत्वा जागरणं निशि ।
श्रुत्वा पुराणं देवस्य माहात्म्यप्रतिपादकम् ॥
प्रातर्विप्राय दत्त्वा तु याचकाय शुभाय च ।
कनकक्रोड़सहितं सन्निवेद्य परिच्छदम् ॥
पश्चात्तु पारणं कुर्य्याज्ज्ञातिलम्पः सुहृद्वृतः ।
एवं कृत्वा नरो विप्रा न भूयः स्तनपो भवेत् ॥
उपोष्यैकादशीं पुण्यां मुच्यते वै ऋणत्रयात् ।
मनोऽभिलषितावाप्तिः कृत्वा सर्व्वव्रतादिकम् ॥”

इति गारुड़े एकादशीमाहात्म्ये १२७ अध्यायः ॥ ( भीमस्य राज्ञः अपत्यं अण् स्त्री । भीमराजनन्दिनी दमयन्ती । यथा, महाभारते । ३ । ६४ । ११ ।

“नाबिभ्यत् सा नृपसुता भैमी तत्राय कस्य-
चित् ।” )

भैरवं, त्रि, (भीरोरिदं त्रासकृत् । भीरु + अण् । ) भयानकम् । इत्यमरः । १ । ७ । २० । ( यथा, महाभारते । १ । १६४ । २७ ।

“सव्येन च कटीदेशे गृह्य वाससि पाण्डवः ।
तद्रक्षो द्विगुणं चक्रे रुवन्तं भैरवं रवम् ॥” )

अस्य पर्य्यायाः भयङ्करशब्दे द्रष्टव्याः ॥

भैरवः, पुं, (भीर्भयङ्करो रवो यस्य । इति भीरव । ततः स्वार्थे अण् ।) शङ्करः । इति मेदिनी । वे. ४६ ॥ भयानकरसः । इत्यमरटीकायां भरतः ॥ नदविशेषः । इति शब्दरत्नावली ॥ रागभेदः । इति हेमचन्द्रः ॥*॥ अष्टभैरवाणामुत्पत्तिर्यथा,

“दैत्याधिपः समुत्पत्य हरोरसि गदां क्षिपत् ।
संस्थितस्तु महायोगी सर्व्वाधारः प्रजापतिः ॥
गदापातक्षताद्भूरि चतुर्धा ह्यगयापतत् ।
पूर्व्वधारासमुद्भूतो भैरवोऽग्निसमप्रभः ॥
विद्याराजेति विख्यातः पद्ममालाविभूषितः ।
तथा दक्षिणधारोत्थो भैरवः प्रेतमास्थितः ॥
कामराजेति विख्यातः कृष्णाञ्जनसमप्रभः ।
नागराजेति विख्यातश्चक्रमालाविभूषितः ॥
क्षतजाद्रुधिराज्जातो भैरवः शूलभूषितः ।
सच्छन्दराजेति विख्यात इन्द्रायुधसमप्रभः ॥
भूयिष्ठाद्रुधिराज्जातो भैरवः फलभूषितः ।
ख्यातो लम्बितराजेति शोभाञ्जनसमप्रभः ॥
ततोऽभूद्देवराजेति भैरवः क्षतजादथ ।
उग्रराजो बभूवाथ क्षतजाद्भैरवोऽपरः ॥
एवं हि सप्तरूपोऽसौ कथ्यते भैरवो मुने ! ।
विघ्नराजोऽष्टमः प्रोक्तो भैरवाष्टकमुच्यते ॥”

इति वामनपुराणे अन्धकवरप्रदाने भैरवप्रादुर्भावे ६७ अध्यायः ॥ * ॥

शारदीयदुर्गापूजायां अष्टौ पूज्यभैरवा यथा,

“आदौ महाभैरवञ्च संहारभैरवं तथा ।
असिताङ्गभैरवञ्च रुरुं भैरवमेव च ॥
ततः कालं भैरवञ्च क्रोधभैरवमेव च ।
ताम्रचूड़ं चन्द्रचूड़ं अन्ते च भैरवद्वयम् ॥
एतान् संपूज्य मध्ये च नवशक्तीश्च पूजयेत् ॥”

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे दुर्गोपाख्याने ६१ अध्यायः ॥

ताम्रचूड़चन्द्रचूड़योः स्थाने कपालभैरवरुद्रभैरवौ ज्ञेयौ । इति तत्रैव गणपतिखण्डे ४१ अध्यायः ॥*॥ अपि च ।

“असिताङ्गो रुरुश्चण्डः क्रोध उन्मत्तसंज्ञकः ।
कपाली भीषणश्चैव संहारश्चाष्टमः स्मृतः ॥”

इति तन्त्रसारः ॥*॥

शिवगणाधिपभैरवो यथा,—

“नन्दी भृङ्गी महाकालो वेतालो भैरवस्तथा ।
अङ्गं भूत्वा महेशस्य वीतभीतास्तपोधनाः ॥
यैर्मानुषशरीरेण प्रापिरे तपसो बलात् ।
गणानामाधिपत्यन्तु ते जानन्ति हरं परम् ॥”

इति कालिकापुराणे ४४ अध्यायः ॥*॥

करवीरपुरराजचन्द्रशेखरपत्नीतारावतीगर्भे महादेवाज्जातपुत्त्रः । स च पुरा भृङ्गी बभूव पार्व्वतीशापात् वानरमुखो भूत्वा भैरव इति नाम्ना ख्यातः । यथा,—

“प्रविवेश ततो देवी स्वयं तारावतीतनौ ।
महादेवोऽपि तस्यान्तु कामार्थं समुपस्थितः ॥
कामावसाने तस्यान्तु सद्यो जातं सुतद्वयम्
अभवन्नृपशार्दूल ! तथा शाखामृगाननम् ॥
ततस्तयोर्नाम चक्रे नारदो वचनान्नृप ! ।
ज्येष्ठो भैरवनामाभूत् भीरोः पुत्त्रो भयङ्करः ।
वेतालसदृशः कृष्णो वेतालोऽभूत्तथापरः ॥”

इति कालिकापुराणे ४६ अध्यायः ॥*॥

अपि च ।

“योऽसौ भृङ्गी हरसुतो महाकालोऽपि भर्गजः ।
तावेव गौरीशापेन सम्भूय नरयोनिजौ ॥
वेतालभैरवौ जातौ पृथिव्यां नृपवेश्मनि ।
यथा भृङ्गिमहाकालावुत्पन्नौ प्राक् तथा शृणु ।
योऽसौ महाभैरवाख्यः सकायः शारभो हरः ।
भैरवः पृथगेवायं गणाध्यक्षो हरात्मजः ॥”

इति कालिकापुराणे ४५ अध्यायः ॥*॥

दुर्जयाख्यगिरिस्थभैरवो यथा,—

“तन्मध्ये भैरवो देवो भर्गसङ्गमसम्भवः ।
दुर्जयाख्ये वरगिरौ स्वर्गस्योपमभूमिगः ॥
योऽसौ शरभरूपस्य मध्यखण्डादिभैरवः ।
स एव भैरवाख्योऽयं पञ्चवक्त्रस्य मन्त्रकैः ।
संपूज्य तत्र मतिमान् स याति शिवलोकताम् ॥”

इति कालिकापुराणे ८२ अध्यायः ॥*॥

भैरवस्य मन्त्रो यथा,—

“केवलः सपरो हादिः षष्ठस्वरसमन्वितः ।
चन्द्रबिन्दुसमायुक्तं हयग्रीवस्य बीजकम् ॥
भैरवं पाण्डुनाथन्तु वनमालिस्वरूपिणम् ।
वाराहेण तु बीजेन पूजयेत्तु विधानतः ॥
सपरौ द्वावनुस्वारविसर्गाभ्यां समन्वितौ ।
महाभैरवमन्त्रोऽयं भैरवं तेन पूजयेत् ॥”

इति कालिकापुराणे ६२ अध्यायः ॥*॥

अस्य ध्यानं यथा,—

“भैरवः पाण्डुनाथश्च रक्तगौरश्चतुर्भुजः ।
गदां पद्मञ्च शक्तिञ्च चक्रञ्चापि करेण च ।
बिभ्रद्देयाः पुरोभागे पूज्योऽयं विष्णुरूपधृक् ॥”

इति तत्रैव ६० अध्यायः ॥ * ॥

अस्य गायत्त्री यथा,—

“महाभैरव विद्महे केलिरूपाय धीमहि ।
तन्नः कामो भैरवस्तु देवी नित्यं प्रचोदयात् ॥
एषा भैरवरूपस्य गायत्त्री मे प्रतिष्ठिता ।
यथेष्टमांसमद्यादिभोजनाय मया धृतः ॥
महाभैरवरूपोऽयं तथा स्त्रीरतिसङ्गमे ।
अयन्तु वाम्यभावेन पूज्यो मद्यादिभिः सदा ॥”

इति कालिकापुराणे ७७ अध्यायः ॥

अथ महाविद्यादीनां भैरवनिरूपणं यथा,—

शिव उवाच ।

“शृणु चार्व्वङ्गि शुभगे ! कालिकायाश्च भैरवम् ।
महाकालं दक्षिणाया दक्षभागे प्रपूजयेत् ॥
महाकालेन वै सार्द्धं दक्षिणा रमते सदा ।
ताराया दक्षिणे भागे अक्षोभ्यं परिपूजयेत ॥
समुद्रमथने देवि ! कालकूटं समुत्थितम् ।
सर्व्वे देवाः सदाराश्च महाक्षोभमवाप्नुयुः ॥
क्षोभादिरहितं यस्मात् पीतं हालाहलं विषम्
अतएव महेशानि ! अक्षोभ्यः परिकीर्त्तितः ॥